Digitized by eGangotri and Sarayu Trust.

❀ अथ ❀

स्व० पं० श्रीवायुनन्दनमिश्रविरचिता

❀ गोदान-पद्धतिः ❀

❀ प्रारभ्यते ❀

[मूल्यम =)॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

❋ अथ गोदान-पद्धतिः ❋

ततो यजमानः शुभासने प्राङ्मुख उप-
विश्य आचम्य प्राणानायम्य ॥ ॐ पवित्रे स्थो
वैष्णव्यौ सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण
पवित्रेण सूर्य्यस्य रश्मिभिः ॥ तस्य ते पवित्र-
पते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥
इति कुशपवित्रधारणम् ॥ ॐ अपवित्रः पवित्रो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत् पुण्डरी-
काक्षं स बाह्याभ्यन्तरः शुचिः । इत्यात्मानं
पूजासामग्रीं च संप्रोक्ष्य ॥ हस्ते अक्षत-पुष्पाणि
गृहीत्वा आनोभद्रादीन् सुमुखश्चैकदन्तश्चेत्यादि-
मङ्गलमन्त्रांश्च पठेत् ॥ सङ्कल्पः ॥ मासोत्तमे
अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे
अमुकगोत्रः अमुकशर्माऽहं मम आत्मना सह
एकविंशतिपुरुषोत्तारणपूर्वकस्वर्गप्राप्त्यर्थं यथाश-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कृत्यलंकृतं स-वत्सगोदानं करिष्ये ॥ तदङ्गत्वेन कलशस्थापनं पूजनं बौधायनोक्तपुण्याहवाचनं च करिष्ये ॥ तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये ॥ हस्ते अक्षतान् गृहीत्वा गणपतिमावाहयेत् ॥ हे हेरम्ब ! त्वमेह्येहि ह्यम्बिकाऽम्बिकात्मज ! ॥ सिद्धिबुद्धिपते ऽयक्ष-लक्षलाभपितुः पितः ॥ नागास्य नागहारस्त्वं गणराज चतुर्भुज ! ॥ भूषितैः स्वायुधैर्दिव्यैः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पाशांकुशपरश्वधैः ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ॥ इहागत्य गृहाण त्वं पूजायागं च रक्ष मे ॥ ॐ गणानान्त्वा० ॥ ॐ गणपतये नमः गणपतिमा० ॥ ॐ अम्बे अम्बिके० । अम्बिकायै नमः अम्बिकामावाहयामि ॥ ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं० समिमन्दधातु ॥ विश्वेदेवास इह मादयन्तामों प्रतिष्ठ ॥ गौरीगणेशौ सुप्र-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तिष्ठिते वरदौ भवेताम् ॥ स्नानं गन्धं अक्षतान् पुष्पमालां धूपं दीपं नैवेद्यं ताम्बूलं दक्षिणा-पुष्पाञ्जलिम् ॥ विघ्नेषार्घः ॥ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ! । भक्तानामभयं कर्ता त्राता भव भवार्णवात् । द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ! । वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद । अनेन फलदानेन फलदोऽस्तु सदा मम ॥ प्रार्थना ॥ विघ्नेश्वराय वरदाय सुरप्रियाय

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लम्बोदराय सकलाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥ अनया पूजया गौरीगणेशौ प्रियेताम् ॥ ततः कलशस्थापनविधिना कलशं प्रतिष्ठाप्य कलशवरुणौ सम्पूज्य ॥ प्रार्थना ॥ देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ ! विधृतो विष्णुना स्वयम् । त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः स-पैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ! ॥ सान्निध्यं कुरु मे देव ! प्रसन्नो भव सर्वदा ॥ बौधायनोक्त-पुण्याहवाचनम् ॥ भो ब्राह्मणाः गोदानकर्मणः पुण्याहं भवन्तो ब्रुवन्तु ॥ ॐ पुन-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न्तु भा० ॥ १ ॥ भो ब्राह्मणाः अस्य कर्मणः कल्याणं भवन्तो० ॥ ॐ यथेमां वाचं० ॥ २ ॥ भो ब्रा० अस्य० ऋद्धिं भ० ॥ ॐ सम्रस्य० ॥ ३ ॥ भो ब्रा० अस्मै कर्मणे स्वस्ति भवन्तो ब्रुवन्तु । ॐ स्वस्ति न० ॥ ४ ॥ भो ब्राह्मणा अस्य कर्मणः श्रीरस्त्विति भव० ॥ श्रीश्च ते० ॥ ५ ॥ कृतस्य बौधायनोक्तपुण्याहवाचनकर्मणः सांगतासिद्ध्यर्थं दक्षिणाद्रव्यं ब्राह्मणेभ्यो विभज्य दातुम-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हमुत्सृजे ॥ ततो वरणद्रव्यं चादाय अमुकगोत्रः अमुकशर्माऽहम् अस्मिन् गोदानकर्मणि एभिर्वरणद्रव्यैः अमुकगोत्रम् अमुकशर्माणं ब्राह्मणं गोप्रतिगृहीतृत्वेन त्वामहं वृणे ॥ वृतोऽस्मीति प्रतिवचनम् ॥ ततो गां प्रोक्षयेत् ॥ ॐ इरावती धेनुमतीहि भूनꣳ सूयवसिनि मनवे दशस्या ॥ व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा । इति मंत्रेण ॥ तद्हे-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ऽक्षतैर्देवानावाहयेत् ॥ तद्यथा ॥ शृङ्गमूलयोः ब्रह्मविष्णुभ्यां नमः ब्रह्मविष्णू आवाहयामि ॥ १ ॥ शृंगाग्रे सर्वतीर्थेभ्यो नमः सर्वतीर्थानावाहयामि ॥ २ ॥ शिरोमध्ये महादेवाय नमः महादेवमावाहयामि ॥ ३ ॥ ललाटाग्रे गौर्यै नमः गौरीमावाहयामि ॥ ४ ॥ नासावंशे षण्मुखाय नमः षण्मुख आवाहयामि ॥ ५ ॥ नासापुटयोः कम्बलाश्वतराभ्यां नमः कम्बलाश्वतरौ० ॥ ६ ॥ कर्णयोः अश्वि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भ्यां नमः अश्विनौ आवाहयामि ॥ ७ ॥ नेत्रयोः शशिभास्कराभ्यां नमः शशिभास्करौ आवाहयामि ॥ ८ ॥ दन्तयोः वायवे नमः वायुमावाहयामि ॥ ९ ॥ जिह्वायां वरुणाय नमः वरुणमावाहयामि ॥ १० ॥ हुँकारे सरस्वत्यै नमः सरस्वतीमावाहयामि ॥ ११ ॥ गंडयोः मासपक्षाभ्यां नमः मासपक्षौ आवाहयामि ॥ १२ ॥ ओष्ठयोः संध्याद्वयाय नमः संध्याद्वयं आवाह० ॥ १३ ॥ ग्रीवायां इन्द्राय

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नमः इन्द्रमावाहयामि ॥ १४ ॥ रक्षोभ्यो नमः रक्षांस्यावाहयामि ॥ १५ ॥ उरसि साध्येभ्यो नमः साध्यानावाहयामि ॥ १६ ॥ जंघयोः धर्माय नमः धर्ममावाहयामि ॥ १७ ॥ खुरमध्ये गन्धर्वेभ्यो० गन्धर्वानावा० ॥ १८ ॥ खुराग्रेषु पन्नगेभ्यो नमः पन्नगानावाहयामि ॥ १९ ॥ खुरपश्चिमे अप्सरोगणेभ्यो नमः अप्सरोगणानावा० ॥ २० ॥ पृष्ठे एकादशरुद्रेभ्यो नमः एकादशरुद्रानावा० ॥ २१ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वसंधिषु वसुभ्यो नमः वसूनावाहयामि ॥ २२ ॥ श्रोणीतटे पितृभ्यो नमः पितॄनावाहयामि ॥ पुच्छे सोमाय नमः सोममावाहयामि ॥ २३ ॥ अधोगात्रेषु द्वादशादित्येभ्यो नमः द्वादशादित्यान्। ॥ २४ ॥ केशेषु सूर्यरश्मिभ्यो नमः सूर्यरश्मीनावाहयामि ॥ २५ ॥ गोमूत्रे गंगायै नमः गंगामावाहयामि ॥ २६ ॥ गोमये यमुनायै नमः यमुनामावाहयामि ॥ २७ ॥ क्षीरे सरस्वत्यै

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नमः सरस्वतीमावाहयामि ॥ २८ ॥ दधिन नर्म-
दायै नमः नर्मदामावाहयामि ॥ २९ ॥ घृते वह्नये
नमः वह्निमावाहयामि ॥ ३० ॥ अष्टाविंशतिदैव-
कोटिभ्यो नमः अष्टाविंशतिदैवकोटीः आवाह-
यामि ॥ ३१ ॥ उदरे पृथिव्यै नमः पृथिवीमावाह-
यामि ॥ ३२ ॥ स्तनेषु चतुर्भ्यः सागरेभ्यो नमः
चतुरः सागराना० ॥ ३३ ॥ सर्वशरीरे कामधेनवे
नमः कामधेनुमावाहयामि ॥ ३४ ॥ इत्यावाह्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूजयेत् ॥ सवत्सधेनवे नमः ॥ स्नानं समर्प-
यामि ॥ वस्त्रं समर्पयामि । गन्धं समर्पयामि ॥
अक्षतान् समर्पयामि ॥ पुष्पमालां समर्पयामि ॥
धूपं समर्पयामि ॥ दीपं समर्पयामि ॥ नैवेद्यं
समर्पयामि ॥ सुरभिर्वैष्णवी माता नित्यं विष्णु-
पदे स्थिता ॥ गोग्रासं तु मया दत्तं सुरभे ! प्रति-
गृह्यताम् ॥ इत्याहारं निवेद्य पुष्पाञ्जलिं
दद्यात् ॥ गोभ्यो यज्ञाः प्रवर्तन्ते गोभ्यो देवाः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समुत्थिताः ॥ गोभ्यो वेदाः समुत्कीर्णा षडंग-पादसक्रमाः ॥ इति पुष्पाञ्जलिः ॥ ततो सवत्सां गां प्राङ्मुखः स्थापयेत् ॥ तां च स्वर्णशृङ्गरौप्य-खुर-ताम्रपृष्ठ-मुक्तालांगूल-घण्टा-चामर-किङ्किणी-कांस्यदोहनीयुतेन सुशोभितं कृत्वा सङ्कल्पं कुर्यात् ॥ देशकालौ सङ्कीर्त्य अमुकगोत्र अमु-कशर्माऽहम् अमुकगोत्रोत्पन्नाय यथोक्तप्रवराय अमु-कशाखाध्यायिने अमुकशर्मणे ब्राह्मणाय इमां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गां सवत्सां रुद्रदैवत्यां सुवर्णशृङ्गयुतां रौप्यखुरां ताम्रपृष्ठीं मुक्तालाङ्गूलां कांस्यदोहां रक्तवस्त्राघृतां घण्टालङ्कृतकण्ठां गन्धाऽक्षतपुष्पमालाशोभितां (यथाशक्त्यलंकृतां वा) तुभ्यमहं सम्प्रददे ॥ ब्राह्मणहस्तोपरि कुशाक्षतजलं दत्वा । द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ॥ इत्यनेन विधिना गृह्णीयात् ॥ ततो कामस्तुतिं पठेत् ॥ ॐ कोऽदात्कस्मा ऽअदात्कामोऽदात्का-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

माद्दात्। कामो दाता कामः प्रतिगृहीता कामैतत्ते। यजमानः प्रार्थनां कुर्यात्॥ यज्ञ-साधनभूता या विश्वस्याघौघनाशिनी॥ विश्व-रूपधरो देवः प्रीयतामनया गवा, इति॥ ततः सुवर्णपरिमितां यथाशक्तिः हिरण्य-तुलसी-दलसंयुक्तां दक्षिणां दद्यात्॥ कृतस्य सवत्स-गोदानकर्मणः साङ्गतासिद्धयर्थं तत्सम्पूर्णफल-प्राप्त्यर्थं इमां दक्षिणां अमुकगोत्रायाऽमुक-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ ततो गोपुच्छतर्पणम् । सतिलजलं गोपुच्छं च गृहीत्वा प्राङ्मुखः सव्येन कुर्यात् ॥ ॐ ब्रह्मा तृप्यतु । ॐ विष्णुस्तृप्यतु । ॐ रुद्रस्तृप्यतु । ॐ मनवस्तृप्यन्तु । ॐ ऋषयस्तृप्यन्तु ॥ ॐ रुद्रातिपुत्रास्तृप्यन्तु ॥ ॐ साध्यास्तृप्यन्तु ॥ ॐ मरुद्गणास्तृप्यन्तु ॥ ॐ ग्रहास्तृप्यन्तु ॥ ॐ नक्षत्राणि तृप्यन्तु ॥ ॐ योगास्तृप्यन्तु ॥ ॐ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

राशयस्तृप्यन्तु ॥ ॐ वसुधा तृप्यतु ॥ ॐ अश्वि-
नौ तृप्येताम् ॥ ॐ यक्षास्तृप्यन्तु ॥ ॐ रक्षांसि
तृप्यन्तु ॥ ॐ मातरस्तृप्यन्तु । ॐ रुद्राणि
तृप्यन्तु ॥ ॐ पिशाचास्तृप्यन्तु ॥ ॐ सुवर्णा-
स्तृप्यन्तु ॥ ॐ पशवस्तृप्यन्तु ॥ ॐ दानवा-
स्तृप्यन्तु ॥ ॐ योगिनस्तृप्यन्तु ॥ ॐ विद्या-
धरास्तृप्यन्तु ॥ ॐ ओषधयस्तृप्यन्तु ॥ ॐ
दिग्गजास्तृप्यन्तु ॥ ॐ देवगणास्तृप्यन्तु ॥ ॐ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यज्ञास्तृप्यन्तु ॥ ॐ देवपत्न्यस्तृप्यन्तु ॥ ॐ लोकपालास्तृप्यन्तु ॥ ॐ नारदस्तृप्यतु ॥ ॐ जन्तवस्तृप्यन्तु ॥ ॐ स्थावरास्तृप्यन्तु ॥ ॐ जङ्गमास्तृप्यन्तु (कण्ठं कृत्वा) ॥ ॐ सनक-स्तृप्यतु ॥ ॐ सनन्दनस्तृप्यतु ॥ ॐ सनात-नस्तृप्यतु ॥ ॐ कपिलस्तृप्यतु ॥ ॐ आसुरि-स्तृप्यतु ॥ ॐ वोढुस्तृप्यतु ॥ ॐ पञ्चशिख-स्तृप्यतु ॥ (अपसव्यम्) ॐ कव्यवाड् तृप्यतु ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ॐ नलस्तृप्यतु ॥ ॐ सोमस्तृप्यतु ॥ ॐ यम-
स्तृप्यतु ॥ ॐ अर्यमास्तृप्यन्तु ॥ ॐ अग्नि-
ष्वातास्तृप्यन्तु ॥ ॐ बर्हिषदस्तृप्यन्तु ॥ ॐ
सोमपा पितरः तृप्यन्तु ॥ ॐ यमस्तृप्यतु ॥
ॐ धर्मराजस्तृप्यतु ॥ ॐ मृत्युस्तृप्यतु ॥ ॐ
अन्तकस्तृप्यतु ॥ ॐ वैवस्वतस्तृप्यतु ॥ ॐ
कालस्तृप्यतु ॥ ॐ सर्वभूतक्षयकरस्तृप्यतु ॥ ॐ
औदुम्बरस्तृप्यतु ॥ ॐ दध्नस्तृप्यतु ॥ ॐ नील-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्तृप्यतु ॥ ॐ परमेष्ठिनस्तृप्यन्तु ॥ ॐ वृकोदरस्तृप्यतु ॥ ॐ चित्रं तृप्यतु ॥ ॐ चित्रगुप्तस्तृप्यतु ॥ ॐ मातृपक्षाश्च ये केचिद्ये केचित् पितृपक्षकाः ॥ गुरु-श्वसुर-बन्धूनां ये कुलेषु समुद्भवाः ॥ ये चाऽन्येषु लुप्तपिण्डाः पुत्रदारविवर्जिताः ॥ क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥ विरूपा आमगर्भाश्च ज्ञाताऽज्ञातकुले मम ॥ ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः ॥ ततो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विप्रसहितां सवत्सां गां त्रिः प्रदक्षिणीकृत्य गोमतीं जपेत् ॥ तद्यथा ॥ गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः ॥ सुरभ्यः सौरभेयश्च सरितः सागरास्तथा ॥ १ ॥ गावः पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा ॥ गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥ २ ॥ गावः सुरभयो नित्यं गावो गुग्गुलसन्निभाः ॥ गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥ ३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अन्नमेव परं गावो देवानां हविरुत्तमम् ॥ याश्च
नः सर्वभूतानि रक्षन्ति च वहन्ति च ॥ ४ ॥
हविषा मन्त्ररूपेण तर्पयन्त्यमरां दिवि ॥ ऋषी-
णामपि होतृणां गावो होमे प्रतिष्ठिताः ॥ ५ ॥
सर्वेषामेव भूतानां गावः शरणमुत्तमम् ॥ गावः
सर्वस्य लोकस्य गावो धन्याः स-वाहनाः ॥ ६ ॥
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्रेभ्यो नमो नमः ॥ ७ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥
एकत्र मन्त्रास्तिष्ठन्ति हविरन्यत्र तिष्ठति ॥ ८ ॥
घृतक्षीरप्रदा गावो घृतयोन्ये घृतोद्भवाः ॥
घृतनद्यो घृतावर्यस्ता मे सन्तु सदा गृहे ॥ ९ ॥
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् ॥
घृतं मे सर्वतश्चैव घृतं मनसि वै घृतम् ॥ १० ॥
गावो ममाग्रतो नित्यं गावो मे सन्तु पृष्ठतः ॥
गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहम् ॥११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ यस्मा-
त्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ १२ ॥
इति पठेत् ॥ ततो गोकर्णे जपेत् ॥ ॐ ह्रीं
नमो भगवत्यै ब्रह्ममात्रे विष्णु-भगिन्यै रुद्र-
दैवतायै सर्वपाप-प्रमोचिन्यै तां स्मर इडे
इडान्ते हव्ये चान्द्रे घृतमति सरस्वति सुस्रुते
एह्येहि हुँ कुरु सर्वलोकमपि एह्येह्यागच्छागच्छ
स्वाहा कर्म ईश्वरार्पणं कुर्यात् । कृतस्य सव-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्सगोदानकर्मणः साङ्गतासिद्ध्यर्थं यथासंख्याकान् ब्राह्मणान् भोजयिष्ये । कृतस्य सवत्सगोदानक-र्मणः तन्मध्ये न्यूनातिरिक्तदोषपरिहारार्थं नानानां गोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं सम्पूर्णतां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यातु सद्यो वन्दे तमच्युतम् ॥ ॐ विष्णवे नमः ॥
ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥

इति काशीस्थ-सुप्रसिद्ध 'मध्यमेश्वर' वास्तव्येनाऽग्नि-
होत्रिणा स्व० पं० श्रीवायुनन्दनमिश्रेण
विरचिता सविधिः गोदान-पद्धतिः
समाप्ता ।

मुद्रकः—मास्टर प्रिण्टिङ्ग वर्क्स, बुलानाला, वाराणसी ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गोदान-सामग्री

रोरी, नारा
अबीर
बुक्का
अक्षत
माला, फूल
धूपबत्ती
घी का दिया
पेड़ा
बतासा
पान

सोपाड़ी
सोने की सींग २
चाँदी का खुर ४
तांबे की पीठ १
मोती की पूँछ १
ओढ़ाने को वस्त्र २
घण्टी २
घुघुरू १६
पगहा २
कांसे की दोहनी १

कांसे का कटोरा १
वरणी १
धोती १
अंगौछा १
आसन १
जनेऊ १
लोटा १
पञ्चपात्र १
आचमनी १
सवत्सा गौ १

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वै०
१०३

❀ इति ❀

गोदान-पद्धतिः ❀

❀ समाप्ता ❀

प्रकाशक—मास्टर खेलाड़ीलाल ऐण्ड सन्स, काशी।

CC-0. In Public Domain. Funding by IKS-MoE